# Jaigishavyakritam Shiva Stotram

# જૈગીષવ્યકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Jaigishavyakritam Shiva Stotram

File name : jaigIShavyakRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 63/32-65||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# જૈગીષવ્યકૃતં શિવસ્તોત્રમ્

જૈગીષવ્ય ઉવાચ ।
નમઃ શિવાય શાન્તાય સર્વજ્ઞાય શુભાત્મને ।
જગદાનન્દકન્દાય પરમાનન્દહેતવે ॥ ૩૨॥

અરૂપાય સરૂપાય નાનારૂપધરાય ચ ।
વિરૂપાક્ષાય વિધયે વિધિવિષ્ણુસ્તુતાય ચ ॥ ૩૩॥

સ્થાવરાય નમસ્તુભ્યં જઙ્ગમાય નમોઽસ્તુતે ।
સર્વાત્મને નમસ્તુભ્યં નમસ્તે પરમાત્મને ॥ ૩૪॥

નમસ્ત્રૈલોક્યકામ્યાય કામાઙ્ગદહનાય ચ ।
નમો શેષવિશેષાય નમઃ શેષાઙ્ગદાય તે ॥ ૩૫॥

શ્રીકણ્ઠાય નમસ્તુભ્યં વિષકણ્ઠાય તે નમઃ ।
વૈકુણ્ઠવન્દ્યપાદાય નમોઽકુણ્ઠિતશક્તયે ॥ ૩૬॥

નમઃ શક્ત્યર્ધદેહાય વિદેહાય સુદેહિને ।
સકૃત્પ્રણામમાત્રેણ દેહિદેહનિવારિણે ॥ ૩૭॥

કાલાય કાલકાલાય કાલકૂટવિષાદિને ।
વ્યાલયજ્ઞોપવીતાય વ્યાલભૂષણધારિણે ॥ ૩૮॥

નમસ્તે ખણ્ડપરશો નમઃ ખણ્ડેન્દુધારિણે ।
ખણ્ડિતાશેષ દુઃખાય ખડ્ગખેટકધારિણે ॥ ૩૯॥

ગીર્વાણગીતનાથાય ગઙ્ગાકલ્લોલમાલિને ।
ગૌરીશાય ગિરીશાય ગિરિશાય ગુહારણે ॥ ૨.૬૩.૪૦॥

ચન્દ્રાર્ધશુદ્ધભૂષાય ચન્દ્રસૂર્યાગ્નિચક્ષુષે ।
નમસ્તે ચર્મવસન નમો દિગ્વસનાય તે ॥ ૪૧॥

જગદીશાય જીર્ણાય જરાજન્મહરાય તે ।

જીવાય તે નમસ્તુભ્યં જગ્જપૂકાદિહારિણે ॥ ૪૨॥

નમો ડમરુહસ્તાય ધનુર્હસ્તાય તે નમઃ ।
ત્રિનેત્રાય નમસ્તુભ્યં જગન્નેત્રાય તે નમઃ ॥ ૪૩॥

ત્રિશૂલવ્યગ્રહસ્તાય નમસ્ત્રિપથગાધર ।
ત્રિવિષ્ટપાધિનાથાય ત્રિવેદીપઠિતાય ચ ॥ ૪૪॥

ત્રયીમયાય તુષ્ટાય ભક્તતુષ્ટિપ્રદાય ચ ।
દીક્ષિતાય નમસ્તુભ્યં દેવદેવાય તે નમઃ ॥ ૪૫॥

દારિતાશેષપાપાય નમસ્તે દીર્ઘદર્શિને ।
દૂરાય દુરવાપ્યાય દોષનિર્દલનાય ચ ॥ ૪૬॥

દોષાકરકલાધાર ત્યક્તદોષાગમાય ચ ।
નમો ધૂર્જટયે તુભ્યં ધત્તૂરકુસુમપ્રિય ॥ ૪૭॥

નમો ધીરાય ધર્માય ધર્મપાલાય તે નમઃ ।
નીલગ્રીવ નમસ્તુભ્યં નમસ્તે નીલલોહિત ॥ ૪૮॥

નામમાત્રસ્મૃતિકૃતાં ત્રૈલોક્યૈશ્વર્યપૂરક ।
નમઃ પ્રમથનાથાય પિનાકોદ્યતપાણયે ॥ ૪૯॥

પશુપાશવિમોક્ષાય પશૂનાં પતયે નમઃ ।
નામોચ્ચારણમાત્રેણ મહાપાતકહારિણે ॥ ૨.૬૩.૫૦॥

પરાત્પરાય પારાય પરાપરપરાય ચ ।
નમોઽપારચરિત્રાય સુપવિત્રકથાય ચ ॥ ૫૧॥

વામદેવાય વામાર્ધધારિણે વૃષગામિને ।
નમો ભર્ગાય ભીમાય નતભીતિહરાય ચ ॥ ૫૨॥

ભવાય ભવનાશાય ભૂતાનાં પતયે નમઃ ।
મહાદેવ નમસ્તુભ્યં મહેશ મહસાં પતે ॥ ૫૩॥

નમો મૃડાનીપતયે નમો મૃત્યુઞ્જયાય તે ।
યજ્ઞારયે નમસ્તુભ્યં યક્ષરાજપ્રિયાય ચ ॥ ૫૪॥

યાયજૂકાય યજ્ઞાય યજ્ઞાનાં ફલદાયિને ।
રુદ્રાય રુદ્રપતયે કદ્રુદ્રાય રમાય ચ ॥ ૫૫॥

શૂલિને શાશ્વતેશાય શ્મશાનાવનિચારિણે ।
શિવાપ્રિયાય શર્વાય સર્વજ્ઞાય નમોઽસ્તુ તે ॥ ૫૬॥

હરાય ક્ષાન્તિરૂપાય ક્ષેત્રજ્ઞાય ક્ષમાકર ।
ક્ષમાય ક્ષિતિહર્ત્રે ચ ક્ષીરગૌરાય તે નમઃ ॥ ૫૭॥

અન્ધકારે નમસ્તુભ્યમાદ્યન્તરહિતાય ચ ।
ઇડાધારાય ઈશાય ઉપેદ્રેન્દ્રસ્તુતાય ચ ॥ ૫૮॥

ઉમાકાન્તાય ઉગ્રાય નમસ્તે ઊર્ધ્વરેતસે ।
એકરૂપાય ચૈકાય મહદૈશ્વર્યરૂપિણે ॥ ૫૯॥

અનન્તકારિણે તુભ્યમમ્બિકાપતયે નમઃ ।
ત્વમોઙ્કારો વષટ્કારો ભૂર્ભુવઃસ્વસ્ત્વમેવ હિ ॥ ૨.૬૩.૬૦॥

દૃશ્યાદૃશ્યં યદત્રાસ્તિ તત્સર્વં ત્વમુ માધવ ।
સ્તુતિં કર્તું ન જાનામિ સ્તુતિકર્તા ત્વમેવ હિ ॥ ૬૧॥

વાચ્યસ્ત્વં વાચકસ્ત્વં હિ વાક્ચ ત્વં પ્રણતોઽસ્મિ તે ।
નાન્યં વેદ્મિ મહાદેવ નાન્યં સ્તૌમિ મહેશ્વર ॥ ૬૨॥

નાન્યં નમામિ ગૌરીશ નાન્યાખ્યામાદદે શિવ ।
મૂકોઽન્યનામગ્રહણે બધિરોઽન્યકથાશ્રુતૌ ॥ ૬૩॥

પઙ્ગુરન્યાભિગમનેઽસ્મ્યન્ધોઽન્યપરિવીક્ષણે ।
એક એવ ભવાનીશ એકકર્તા ત્વમેવ હિ ॥ ૬૪॥

પાતા હર્તા ત્વમેવૈકો નાનાત્વં મૂઢકલ્પના ।
અતસ્ત્વમેવ શરણં ભૂયોભૂયઃ પુનઃપુનઃ ॥ ૬૫॥

સંસારસાગરે મગ્નં મામુદ્ધર મહેશ્વર ।
ઇતિ સ્તુત્વા મહેશાનં જૈગીષવ્યો મહામુનિઃ ॥ ૬૬॥

વાચં યમો ભવત્સ્થાણોઃ પુરતઃ સ્થાણુસન્નિભઃ ॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે ત્રિષષ્ટિતમા- ધ્યાયાન્તર્ગતં
જૈગીષવ્યકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૬૩/૩૨-૬૫॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 63/32-65..

Proofread by PSA Easwaran

*Jaigishavyakritam Shiva Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*